दशमः पाठः

# ईद-महोत्सवः

[ईदमहोत्सवः महम्मदीयानां सर्वोत्तमः उत्सवः। अस्मिन् उत्सवे सामाजिक-मानवीय- सद्भावनायाः अत्याकर्षकं दृश्यं लभ्यते। उत्सवेऽस्मिन् सर्वे जनाः परस्परं मिलन्ति सहैव खादन्ति आनन्दाब्धौ च निमज्जन्ति। उत्सवोऽयम् एकतायाः प्रसन्नतायाः औदार्यस्य च परिचायकः। अस्मिन् उत्सवे एकतायाः यादृशम् अभिज्ञानं प्राप्यते तादृशं नान्येषु उत्सवेषु।]

भारतदेस्य परम्परा धर्मप्रधाना। देशेऽस्मिन् नाना धर्माः सन्ति। येन प्रकारेण हिन्दूनां मुख्योत्सवाः दीपावली-रक्षाबन्धन-दुर्गापूजा-प्रभृतयः सन्ति तथैव महम्मदीयानाम् उत्सवेषु सर्वोत्तमः 'ईद' इति मन्यते। मूलतः उत्सवोऽयं तपस्यायाः उपासनायाश्च पर्व मन्यते। सामाजिक-मानवीय-सद्भावनायाः दृष्ट्या अपि अत्याकर्षकमिदं पर्व। अस्मिन् पर्वणि महम्मदीयाः रमजानमासे चन्द्रमसं विलोक्य 'रोजा' इति व्रतं प्रारभन्ते। अस्यां रोजायां पूर्णं दिनं व्रतधारिणः उपवासं कुर्वन्ति। पुनः संध्याकाले सम्मिल्य 'इफ्तार' नामकम् उपवासभंगं कुर्वन्ति। मासमेकं यावत् इदम् पर्व भवति।

मासस्यान्तिमे शुक्रवारे (जुमा इति ख्याते) ते रमजानस्य मासावसाने च संध्यायां पुनः चन्द्रं दृष्ट्वा अन्येद्युः प्रातःकाले ईदस्य 'नमाज' इति प्रार्थनां कुर्वन्ति। अनुष्ठानमिदं सामूहिकरूपेण पूर्णं क्रियते। एतदर्थमेव नमाजस्थानम् 'ईदगाह' कथ्यते। नैतादृशम् आनन्ददायकम् अन्यत् पर्व। ईदमहोत्सवस्य दिने जनाः नवानि वसनानि धारयन्ति। मधुराणि पक्वान्नानि च मिलित्वा खादन्ति। पक्वान्नेषु- सूत्रिका (सेवई) प्रधाना। दुग्धयुक्तानि अन्यानि वस्तूनि च खाद्यन्ते। चिकित्साशास्त्रदृष्ट्या मनसः वचसः कर्मणश्च शुद्ध्यर्थमिदं पर्व मन्यते। अवसरेऽस्मिन् प्रायः सर्वे जनाः निर्धनाः धनिकाश्च यथाशक्ति दीनार्तानाम् सेवार्थं दानं कुर्वन्ति। तदेव दानं 'जकात' इति 'फितरा' इति च कथ्यते। तद्दानम् अनिवार्यं मन्यते। वर्षे वर्षे समागतस्य ईदमहोत्सवस्य प्रतीक्षा सर्वैः क्रियते। यतः सर्वानपि आनन्दसागरेऽयं निमज्जयति। धन्योऽयमुत्सवः एकतायाः प्रसन्नतायाश्च औदार्यस्य च प्रतीकः।

**सर्वधर्मसमत्वेन भारतेऽपि महोत्सवः ।**
**ईदाख्यो वार्षिकोऽप्येष परमानन्ददायकः ॥**

## शब्दार्थाः

| | | |
|---|---|---|
| **ईदगाह** | नमाजस्थानम् | नमाज का स्थान |
| **महम्मदीयाः** | मुस्लिमजनाः | मुसलमान लोग |
| **सम्मिल्य** | परस्परं मिलित्वा | परस्पर मिलकर |
| **अन्येद्युः** | अपरस्मिन् दिवसे | दूसरे दिन |
| **मासावसाने** | मासान्ते | महीने के अंत में |
| **शुद्ध्यर्थम्** | शुद्धये, शोधनाय | शुद्धि के लिए |
| **नैतादृशम्** | नैतत् समानम् | इसके समान नहीं |
| **उत्सवः** | समारोहः | आनन्द का अवसर |
| **जकात** | दानविशेषः | एक प्रकार का दान |

## व्याकरणम्

1. **सन्धिविच्छेदः**

**देशेऽस्मिन्** – देशे + अस्मिन्

**देशोऽयम्** – देशः + अयम्

**मुख्योत्सवाः** – मुख्य + उत्सवाः

**उपासनायाश्च** – उपासनायाः + च

**वार्षिकोऽप्येष** – वार्षिकः + अपि + एष

**परमानन्ददायकः** – परम + आनन्ददायकः

## अभ्यासः (मौखिकः)

1. **अधोलिखितप्रश्नानाम् उत्तराणि एकवाक्येन संस्कृतभाषया वदत–**

(क) हिन्दूनाम् मुख्योत्सवा: के के सन्ति?

(ख) महम्मदीयानां सर्वोत्तम: उत्सव: क: मन्यते?

(ग) ईदपर्व कीदृशम् पर्व अस्ति?

(घ) ईदपर्वणि महम्मदीया: किम् विलोक्य 'रोजां' प्रारभन्ते?

(ङ) 'ईदगाह:' क: कथ्यते?

## अभ्यासः (लिखितः)

1. **अधोलिखितप्रश्नानामुत्तराणि एकवाक्येन संस्कृतभाषया लिखत–**

(क) धर्मप्रधानदेश: क:?

(ख) ईदपर्वणि व्रतधारिण: किं कुर्वन्ति?

(ग) नमाजस्थानं किं कथ्यते?

(घ) ईदपर्वणि निर्धना: धनिकाश्च किं कुर्वन्ति?

(ङ) ईदावसरे यत् दानं भवति तम् किं कथ्यते?

2. **अधोलिखितवाक्येषु रेखाङ्कि.तपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत–**

(क) <u>भारतदेशोऽयं</u> धर्मप्रधान:।

(ख) <u>अस्मिन्</u> देशे बहव: धर्मा: सन्ति।

(ग) महम्मदीयानां सर्वोत्तम: उत्सव: <u>'ईद'</u> इति मन्यते।

(घ) ईदानुष्ठानम् <u>सामूहिकरूपेण</u> पूर्णं क्रियते।

(ङ) <u>ईदपर्व</u> एकस्मिन् वर्षे एकवारम् आयाति।

3. **सन्धिविच्छेदं कुरुत–**

(i) देशोऽयम् (ii) देशेऽस्मिन् (iii) मुख्योत्सवा: (iv) उत्सवोऽयम् (v) अम्याकर्षकम् (vi) मासावसाने (vii) अनुष्ठानमिदं (viii) नैतादृशम् (ix) कर्मणश्च (x) धनिकाश्च।

4. **रेखाङ्कितपदेषु विभक्तिकारणं लिखत–**

(क) अत्याकर्षकम् इदम् पर्व अस्ति।

(ख) महम्मदीयाः चन्द्रमसं विलोक्य 'रोजा' इति रमजानमासे प्रारभन्ते।

(ग) मासमेकं यावत् इदम् पर्व भवति।

(घ) चिकित्साशास्त्रदृष्ट्या मनसः वचसः कर्मणश्च शुद्ध्यर्थम् इदम् पर्व मन्यते।

5. **'क' स्तम्भस्य प्रकृति-प्रत्ययां-योगः 'ख' स्तम्भे दत्तः। तयोः समुचितमेलनं कुरुत–**

| क | ख |
|---|---|
| (i) मिल + क्त्वा | (क) बहुधा |
| (ii) बहु + धा | (ख) तथा |
| (iii) तत् + थाल् | (ग) मिलित्वा |
| (iv) दृश् + क्त्वा | (घ) विलोक्य |
| (v) वि + लोक् + ल्यप् | (ङ) दृष्ट्वा |

## योग्यता-विस्तारः

### (क) भावविस्तारः

सामाजिकमानवीयसद्भावनायाः दृष्ट्या अपि अत्याकर्षकं पर्व अस्ति। अस्मिन् पर्वणि सर्वे सम्मिल्य इफ्तारनामकं उपवासभंगं कुर्वन्ति। सर्वे सहैव अस्य महोत्सवस्य दिने खादन्ति मिलन्ति च।

### (ख) प्रमुखशब्दानाम् विशेषज्ञानम्

(i) **बहुधा** – अत्र बहुशब्दात् 'धा' प्रत्ययः।

(ii) **उत्सवः** - उद्गत सवः (दुःखम्) यत्र सः उत्सवः इति कथ्यते।

(iii) **विलोक्य** - 'वि' उपसर्गपूर्वकात् लोक् धातोः ल्यप् प्रत्ययः ततः 'विलोक्य' इति भवति।

(iv) **मूलतः** - मूलशब्दात् 'तसिल्' प्रत्ययः।

**(ग) ईदमहोत्सवस्य विषये उर्दूभाषायां कश्चित् कविः कथयति–**

ऐसी न शबेरात न बकरीद की खुशी ।
जैसी हरेक दिल में है इस ईद की खुशी ।।